शाङ्खायन विवाह मन्त्राः

१.६.१. अनृक्षरा ऋजवः सन्तु पन्था येभिः सखायो यन्ति नो वरेयम् ।
समर्यमा सम्भगो नो निनीयात् सं जास्पत्यं सुयममस्तु देवाः ॥

१.६.५. अनाधृष्टमस्यानाधृष्टय़ देवानामोजाऽनभिशस्त्यभिशस्तिपा
अनभिशस्तेयमञ्जसा सत्यमुपगेषं सुविते मा धा॥

१.५.६. आ नः प्रजां जनयतु प्रजापतिराजरसाय समनक्त्वर्यमा ।
अदुर्मङ्गलीः पतिलोकमा विश शं नो भव द्विपदे शं वतुष्पदे ॥
प्रजां त्वयि दधामि, पशूँस्त्वयि दधामि, तेजो ब्रह्मवर्चसं त्वयि दधामि ॥

१.७.९. अग्निं प्रणयामि मनसा शिवेनायमस्तु संगमतो बहूनाम् ।
मा नो हिंसीः स्थविरं मा कुमारं शं नो भव द्विपदे शं चतुष्पदे ॥

१.८.२१. सवितुष्ठ्वा प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः ॥

१.९.९. अग्निर्जनिता स मेऽमू जायां ददातु स्वाहा ॥ सोमो जनिमान्त्स माऽमुया जनिमन्तं करोतु स्वाहा ॥ पूषा ज्ञातिमानन्त्स माऽमुष्यै पित्रा मात्रा भ्रातृभिर्ज्ञातिमन्तं करोतु स्वाहा ॥

१.१०.७. हुतोऽग्निहोत्रहोमेनाऽहुतो बलिकर्मणा ।
प्रहुतः पितृकर्मणा प्राशीतो ब्राह्मणे हुतः ॥

१.१०.८. अनूर्ध्वज्ञु व्यूॅळजानुर्जुहुयात् सर्वदा हविः ।
न हि बाह्यहुतं देवाः प्रतिगृह्णन्ति कर्हिचित् ॥

१.१०.९. रौद्रं तु राक्षसं पित्र्यमासुरं चाऽऽभिचारिकम् ।
उक्त्वा मन्त्रं स्पृशेदप आलभ्यात्मानमेव च ॥

१.१२.३. रैभ्यासीदनुदेयी नाराशंसी न्योचनी ।
सूर्याय भद्रमिद्वासो गाथयैति परिष्कृतम् ॥

१.१२.४. चित्तिर उपब्रह्मणं चक्षुरा अभ्यञ्जनम् ।
द्योर्भूमिः कोश आसीद् यदायात् सूर्या पतिम् ॥

१.१२.५. समञ्जन्तु विश्वे देवाः समापो हृदयानि नौ ।
सं मातरिश्वा सं धाता समु देष्ट्री दधातु नौ ॥

१.१२.६. यथेय शचीं वावातां सुपुत्रां च यथाऽदितिं ।
अविधवां चापालामेवं त्वामिह रक्षातादिममि ॥

१.१२.७. रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय ।

इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दश ॥
१.१२.८. नीललोहितं भवति कृत्यासक्तिर्व्यज्यते ।
एधन्ते अस्या ज्ञातयः पतिर्बन्धेषु बध्यते ॥
१.१२.९. मधुमतीरोषधीर्द्याव आपो मधुमन्नो भवत्वन्तरिक्षम् ।
क्षेत्रस्य पतिर्मधुमान् नो अस्त्वरिष्यन्तो अन्वेनं चरेम ॥
१.१३.१. सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्वां भव ।
ननान्दरि सम्राज्ञी भव सम्राज्ञी अधि देवृषु ॥
१.१३.२. गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः ।
भगो अर्यमा सविता पुरंधिर्मह्यं त्वादुर्गार्हपत्याय देवाः ॥
१.१३.४. अमोऽहमस्मि सा त्वं सा त्वमस्यमोऽहम् ।
द्योरहं पृथिवी त्वं सामाहमृक्त्वं तावेहि विवहावहै ।
प्रजां प्रजनयावहै संप्रियौ रोचिष्णू सुमनस्यमानौ जीवेव शरदः शतम् ॥
१.१३.१२. एह्यश्मानमातिष्ठाश्मेव त्वं स्थिरा भव ।
अभि तिष्ठ पृतन्यतः सहस्व पृतनायत ॥
१.१४.१. इयं नार्युपब्रूतेऽग्नौ लाजानावपन्तिका ।
शिवा ज्ञातिभ्यो भूयासं चिरं जीवतु मे पतिः ॥
१.१४.६. इष एकपद्यूर्जे द्विपदी रायस्पोषाय त्रिपदी मायोभव्याय चतुष्पदी प्रजाभ्यः
पञ्चपद्यृतुभ्यः षट्पदी सखा सप्तपदी भव सा मामनुव्रता भव । पुत्रान्विन्दावहै
बहूँस्ते सन्तु जरदष्टयः ॥
१.१४.८. आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन । महे रणाय चक्षसे ॥
यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥
तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥
१.१५.१. प्र त्वा मुञ्चामि वरुणस्य पाशाद् येन त्वाबध्नात् सविता सुशेवः ।
ऋतस्य योनौ सुकृतस्य लोकेऽरिष्टां त्वा सह पत्या दधामि ॥
१.१५.२. जीवां रुदन्ती विमयन्तो अध्वरे दीर्घामनुप्रसितिं दीधियुर्नरः ।
वामं पितृभ्यो य इदं समेरिरे मयः पतिभ्यो जनयः परिष्वज ॥
१.१५.३. अक्षन्तमीमदन्त ह्यव प्रिया अधूषत ।
अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजा न्विन्द्र ते हरि ॥
१.१५.४. शुची ते चक्रे यात्या व्यानो अक्ष आहतः ।

अनो मनस्मयं सूर्यरोहत्प्रयती पतिम् ॥
द्वे ते चक्रे सूर्ये ब्रह्माण ऋतुथा विदुः ।
अथैकं चक्रं यद्गुहा तदद्धाताय इद्विदुः ॥
१.१५.६. खे रथस्य खेऽनसः खे युगस्य शतक्रतो ।
अपालमिन्द्र त्रिष्पूत्व्यकृणोः सूर्यत्वचम् ॥
१.१५.८. युत्तस्ते अस्तु दक्षिण उत सव्यः शतक्रतो ।
तेन जायामुप प्रियां मन्दानो याह्यन्धसो योजा न्विन्द्र ते हरी ॥
युनज्मि ते ब्रह्मणा केशिना हरी उप प्र याहि दधिषे गभस्त्योः ॥
उत् त्वा सुतासो रभसा अमन्दिषुः पूषण्वान् वज्रिन्त्समु पत्न्यामदः ॥
शुक्रावनड्वाहावास्तां यदयात्सूर्या गृहम् ॥
१.१५.१०. अभि व्ययस्व खदिरस्य सारमोजो धेहि स्पन्दने शिंशपायाम् ।
अक्ष वीडो वीडित वीडयस्व मा यामादस्मादव जीहिपो नः ॥
१.१५.११. त्यं चिदश्वं न वाजिनमरेणवो यमत्नत ।
दृळ्हं ग्रन्थिं न वि ष्यतमत्रिं यविष्ठमा रजः ॥
१.१५.१२. स्वस्ति नो मिमीतामश्विना भगः स्वस्ति देव्यदितदितिरनर्वणः ।
स्वस्ति पूषा असुरो दधातु नह् स्वस्ति द्यावापृथिवी सुचेतुना ॥
स्वस्तये वायुमुप ब्रवामहे सोम स्वस्ति भुवनस्य यस्पतिः ।
ब्रहस्पतिं सर्वगणं स्वस्तये स्वस्तय आदित्यासो भवन्तु नः ॥
विश्वे देवा नो अद्या स्वस्तये वैश्वानरो वसुरग्निः स्वस्तये ।
देवा अवन्त्वृभवः स्वस्तये स्वस्ति नो रुद्रः प्रात्वंहसः ॥
स्वस्ति मित्रवरुणा स्वस्ति पथ्ये रेवति ।
स्वस्ति न इन्द्रश्चाग्निश्च स्वस्ति नो अदिते कृधि ॥
स्वस्ति पन्थमनु चरेम सूर्याचन्द्रमसाविव ।
पुनर्ददताघ्नता जानता सं गमेमहि ॥
१.१५.१३. सुकिँशुकँ शल्मलिं विश्वरूपँ हिरण्यवर्णँ सुधुरँ सुचक्रम् ।
आरोह सूर्ये अमृतस्य लोकं स्योनं पत्ये वहतुं कृणुष्व ॥
१.१५.१४. मा विदन्परिपन्थिनो य आसीदन्ति दम्पती ।
सुगेभिर्दुर्गमतीतामप द्रान्त्वरातयः ॥
१.१५.१५. ये वध्वश्चन्द्र वहतुं यक्ष्मा यन्ति जनादनु ।

पुनस्तान्यज्ञिया देवा नयन्तु यत आगताः ॥
१.१५.१६. वनस्पते शतवल्शो वि रोह सहस्रवल्शा वि वयं रुहेम ।
यं त्वामयं स्वधितिस्तेजमानः प्रणिनाय महते सौभगाय ॥
१.१५.१७. सुत्रमाणं पृथिवीं द्यामनेहसं सुशर्माणमदितिं सुप्रणीतिम् ।
दैवीं नाविं स्वरित्रामनागसमस्रवन्तीमा रुहेमा स्वस्तये ॥
१.१५.१८. अश्मवन्ती रीयते सं रभध्वमुतिष्ठत प्र तरता सखायः ।
अत्रा जहाम ये असन्नशेवाः शिवान्वयमुत्तरेमाभि वाजान् ॥
१.१५.२०. उद्व ऊर्मिः शम्या हनत्वापो योक्त्राणि मुञ्चत ।
मादुष्कृतौ व्येनसाऽघ्न्यौ शूनमारताम् ॥
१.१५.२२. इह प्रियं प्रजाया ते समृध्यतामस्मिन् गृहे गार्हपत्याय जागृहि ।
एना पत्या तन्वं सं सृजस्वाधा जिव्री विदथमा वदाथः ॥
परा देहि शामुल्ये ब्रह्माभ्यो वि भजा वसु ।
कृत्येषा पद्वती भूत्व्या जाया विशते पतिम् ॥
अश्रिरा तनूर्भवति रुशति पापयामुया ।
पतिर्यद्वध्वो वाससा स्वमङ्गमभिधित्सते ॥
सुमङ्गलीरियं वधूरिमां समेत पश्यत ।
सौभाग्यमस्यै दत्त्वायाथास्तं विपरेतन ॥
१.१६.३. अग्निना देवेन पृथिवीलोकेन लोकानामृग्वेदेन वेदानां त्वा शमयाम्यसौ स्वाहा ।
वायुना देवेनान्तरिक्षेण लोकेन लोकानां यजुर्वेदेन वेदानां तेन त्वा शमयाम्यसौ
स्वाहा । सूर्येन देवेन दिवो लोकेन लोकानां सामवेदेन वेदानां तेन त्वा
शमयाम्यसौ स्वाहा । चन्द्रेण देवेन दिशां लोकेन लोकानां ब्रह्मदेव
१.१६.४. भूर्या ते पतिघ्न्यलक्ष्मी देवरघ्नी जारघ्नी तां करोमि तेऽसौ ॥
१.१६.५. अघोरचक्षुरपतिध्न्ये धि शिवा पशुभ्यः सुमना सुवर्चाः ।
वीरसूर्देवकामा स्योना शं नो भव द्विपदे शं चतुष्पदे ॥
१.१६.६. कया नश्चित्र आ भुव दूती सदावृधः सखा । कया शचिष्ठया वृता ॥
कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदन्धसः । दृळहा चिदारुजे वसु ॥
अभी षु णः सखीनामविता जरितृणाम् । शतं भवास्यूतिभिः ॥
१.१६.७. उता त्या दैव्या भिषजा शं नः करतो अश्विना । युयुयातमितो रपो अप स्रिधः ॥
१.१६.८. आ ते योनिं गर्भं एतु पुमान् बाण इवेषुधिम् ।

आ वीरो अत्र जायतां पुत्रस्ते दशमास्यः ॥
१.१६.१२. इहैव स्तं मा वि यौष्टं विश्वमायुर्व्यश्नुतम् ।
क्रीळन्तौ पुत्रैर्नप्तृभिर्मोदमानौ स्वे गृहे ॥
१.१७.१. दधिक्राण्वो अकारिषं जिष्णोरश्वस्य वाजिनः ।
सुरभि नो मुखा करत् प्र ण आयूंषि तारिषत् ॥
१.१७.३. ध्रुवैधि पोष्या मयि मह्यं त्वादाद्बृहस्पति ः ।
मया पत्या प्रजावती सं जीव शरद शतम् ॥
१.१७.४. ध्रुवं पश्यामि प्रजां विन्देय ॥
१.१७.७. पिबतं च् तृप्णुतं चा च गच्छतं प्रजां च धत्तं च द्रविणं च धत्तम् ।
सजोषसा उषसा सूर्येण चोर्जं नो धत्तमश्विना ॥
जयतं च प्र स्तुतं च प्र चावतं । प्रजां च धत्तं च द्रविणं च धत्तम् ।
सजोषसा उषसा सूर्येण चोर्जं नो धत्तमश्विना ॥
हतं च शत्रून् यततं च मित्रिणः प्रजां च धत्तं च द्रविणं च धत्तम् ।
सजोषसा उषसा सूर्येण चोर्जं नो धत्तमश्विना ॥
१.१८.३. अग्ने प्रायश्चित्तिरसि त्वं देवानां प्रायश्चित्तिरसि ।
यास्याः पतिघ्नी तनूस्तामस्या अप जहि ।
वायो प्रायश्चित्तिरसि त्वं देवानां प्रायश्चित्तिरसि ।
यास्याः अपुत्रिया तनूस्तामस्या अप जहि ।
सूर्यं प्रायश्चित्तिरसि त्वं देवानां प्रायश्चित्तिरसि ।
यास्याः अपशव्या तनूस्तामस्या अप जहि ।
अर्यमणं नु देवं कन्या अग्निमयक्षत ।
सोमां देवो अर्य्यमा प्रेतो मुञ्चातु मामुतः ॥
वरुणं नु देवं कन्या अग्निमयक्षत ।
सोमां देवो वरुण प्रेतो मुञ्चातु मामुतः ॥
पूषणं तु देवं कन्या अग्निमयक्षत ।
सोमां देवः पूषा प्रेतो मुञ्चातु मामुतः ॥